॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૭. સપ્તમઃ સર્ગઃ
અથ હૈમવતે તટાંતરે બદરીષંડવિશેષમંડિતમ ।
પરમાશ્રમમાશ્રયં શ્રિયઃ સકલજ્ઞઃ સ દદર્શ વિશ્રુતમ ॥ ૭.૧ ॥

હિમવર્ષરવિપ્રભાસહાઃ પૃથુસત્રપ્રથિતા દ્વિજાશ્રયાઃ ।
અપિ વિષ્ણુપદસ્પૃશોઽલસનુભયે યત્ર વિચિત્રશાખિનઃ ॥ ૭.૨ ॥

શ્રવણામૃતગીર્ગણૈર્દ્વિજૈઃ શુકમુખ્યૈઃ શુભપક્ષિભિર્વૃતમ ।
કમલેષ્ટતમસ્થિરાંતરૈઃઅપિ હંસૈઃ પરમૈરમેચકૈઃ ॥ ૭.૩ ॥

સુમનોનિકરેણ પૂરિતં સ્વમનોઽભીષ્ટદમલ્પદુર્ગમમ ।
અપરસ્પરમત્સરપ્રજં નનુ વૈકુંઠમિવાચ્યુતાલયમ ॥ ૭.૪ ॥

તમિમં પ્રવિશંતમાશ્રમં દ્વ્યધિકત્રિંશદુદારલક્ષણમ ।
ગુણસારવિદઃ કુતૂહલાદ અવલોક્યર્ષય ઈત્યચિંતયન ॥ ૭.૫ ॥

કનકાતુલતાલસન્નિભઃ કમલાક્ષો વિમલેંદુસન્મુખઃ ।
ગજરાજગતિર્મહાભુજઃ પ્રતિયાન કોઽયમપૂર્વપૂરુષઃ ॥ ૭.૬ ॥

અતિશાંતવપુર્નિશાકરઃ સ્વયમેકાંતખરો દિવાકરઃ ।

ઈતિ નાસ્ય ગુણાર્ણવાકૃતેઃઉપમાનં ભુવનેષુ લભ્યતે ॥ ૭.૭ ॥

પરમાશ્રમિણાં ગતશ્રમો નનુ ચિહ્નાનિ બિભર્તિ ધીરધીઃ ।
અપિ માનુષભાવવિગ્રહો વિપુલં વિસ્મયમાતનોતિ નઃ ॥ ૭.૮ ॥

ચતુરશ્ચતુરાનનઃ સ્વયં પવનો વા વ્રતિરૂપ આવ્રજન ।
શૃતિનાથદિદૃક્ષયાઽન્યથા ન ખલુ સ્યાન્નિખિલાગ્ર્યલક્ષ્મવાન ॥ ૭.૯ ॥

અવલોકિતલક્ષણઃ સ તૈઃ ઈતિ સંચિંત્ય કુતૂહલાકુલૈઃ ।
અવિળંબગતિર્ન્યશામયત તરુમારાત સુરપાદપોત્તમમ ॥ ૭.૧૦ ॥

મસૃણત્વચમુન્નતં તતં બહુશાખાફણસૂનરત્નકમ ।
ભગવંતમનંતમંતિકે સ્થિતમીશસ્ય નિષેવણાય વા ॥ ૭.૧૧ ॥

અતિચિત્રવિચિત્રપત્રિણં બહુવર્ણં હરિગોનિવારકમ ।
મુનિનંદનમિંદિરાપતેઃ અધિકેષ્ટં પતતામિવાધિપમ ॥ ૭.૧૨ ॥

અમૃતાત્મમહાફલપ્રદં દુરવાપં હરિભક્તિવર્જિતૈઃ ।
શ્રિતસાધુપુરાણભારતં નિગમં મૂર્તમિવોરુશાખિનમ ॥ ૭.૧૩ ॥

અથ તસ્ય સ વેદિકાંતરે સુવિશાલે વિમલે મનોહરે ।
અવલોકિતવાનનંતધીઃદિવિ દેવાનિવ તાપસોત્તમાન ॥ ૭.૧૪ ॥

અપિ સપ્તતયા વિરાજિતાન ગતસંખ્યાન ગુણિનો ગુણોજ્ઝિતાન ।
અપિ મન્યુમદાદિવર્જિતાન ગતભોગાન પવનાશનાન સદા ॥ ૭.૧૫ ॥

મુનિમંડલમધ્યવર્તિનં ત્રિજગન્મંડલમંડનાયિતમ ।
ઈહ સત્યવતીસુતં હરિં પરિપૂર્ણપ્રમતિઃ સમૈક્ષત ॥ ૭.૧૬ ॥

નિજહૃત્કમલેઽતિનિર્મલે સતતં સાધુ નિશામયન્નપિ ।
અવલોક્ય પુનઃપુનર્નવં તમસૌ વિસ્મિત ઈત્યચિંતયત ॥ ૭.૧૭ ॥

અગણય્યગુણાર્ણવોઽમલઃ સ હિ નારાયણ એષ કેવલમ ।
વિધિનાઽનુસૃતં પરાશરાત સુષુવે સત્યવતી કિલાત્ર યમ ॥ ૭.૧૮ ॥

ધવળેઽસ્ય મનઃપયોનિધૌ સદનુક્રોશગિરીંદ્રલોળિતે ।
પ્રકટીભવતિ સ્મ સુંદરી દયિતા દૈત્યરિપોસ્ત્રયીમયી ॥ ૭.૧૯ ॥

ઈત એવ પુરાણગૌરગૌ સમહાભારતપારિજાતકે ।
સતિ જાતવતિ વ્યજાયત પ્રવરં સૂત્રગણામૃતં સ્વયમ ॥ ૭.૨૦ ॥

નિરવગ્રહમુર્વનુગ્રહં વિદધત પાંડુસુતાદિસજ્જને ।
અવનાવવનાય સંવિદાં સુચિરાયૈષ ચચાર ચારુગીઃ ॥ ૭.૨૧ ॥

અધુના કલિકાલવૃત્તયે સવિતેવ ક્ષણદાનુવૃત્તયે ।
જનદૃગ્વિષયત્વમત્યજદ્ભગવાનાશ્રમમાવસન્નિમમ ॥ ૭.૨૨ ॥

તદિદં વપુરસ્ય દૃશ્યતે દલિતેંદીવરસુંદરદ્યુતિ ।
પરમાજિનયોગપીઠગં મમ ચેતોનયનાભિનંદનમ ॥ ૭.૨૩ ॥

અગણય્યગુણૈઃ સુપૂરિતં પરિપૂર્ણાગણિતાત્મસદ્ગુણૈઃ ।
ઈદમસ્તસમસ્તદૂષણં સચિદાનંદમયં હિ કેવલમ ॥ ૭.૨૪ ॥

કમલાકમલાસનાનિલૈઃ વિહગાહીંદ્રશિવેંદ્રપૂર્વકૈઃ ।
પદપદ્મરજોઽસ્ય ધારિતં શિરસા હંત વહામ્યહં મુહુઃ ॥ ૭.૨૫ ॥

પ્રણમામિ પદદ્વયં વિભોઃ ધ્વજવજ્રાંકુશપદ્મચિહ્નવત ।
નિજમાનસરાગપીડનાદરુણીભૂતમિવારુણં સ્વયમ ॥ ૭.૨૬ ॥

નનુ કેવલમેવ વૈષ્ણવં શ્રિતવંતઃ પદમાત્મરોચિષા ।
તમસોઽપ્યુભયસ્ય નાશકા વિજયંતે નખરા નવં રવિમ ॥ ૭.૨૭ ॥

સુકુમારતળાંગુલીમતોઃ પદયોરસ્ય નિગૂઢગુલ્ફયોઃ ।
ઉપમાનમહો ન લભ્યતે કવિવર્યૈરિતરેતરં વિના ॥ ૭.૨૮ ॥

ઉચિતાં ગુરુતાં દધત ક્રમાત શુચિ તેજસ્વિ સુવૃત્તમુત્તમમ ।
ભજતોઽત્ર ચ ભાજયત્યદો વિભુજંઘાયુગળં સરૂપતામ ॥ ૭.૨૯ ॥

અચલાસનયોગપટ્ટિકા વરકક્ષ્યા સકૃદાપ્તમિષ્ટદમ ।

પરિતોઽપિ હરિં સ્ફુરંત્યહો અનિશં ધન્યતમેતિ મે મતિઃ ॥ ૭.૩૦ ॥

રુચિરેણ વરૈણચર્મણા રુચિરાજદ્યુતિચારુરોચિષા ।
પરમોરુનિતંબસંગિના પરમાશ્ચર્યતયા વિરાજ્યતે ॥ ૭.૩૧ ॥

તનુનિમ્નસુનાભિશોભિતે વલિભે વારિજનાભ આદધે ।
પ્રતનાવતિસુંદરે મૃદૌ ઉદરેઽસ્મિન જગદંડમંડલમ ॥ ૭.૩૨ ॥

હૃદયે કૃતસજ્જનોદયે સુવિશાલે વિમલે મનોહરે ।
ઉભયં વહતિ ત્રયીમયં ભગવાન બ્રહ્મસુસૂત્રમુત્તમમ ॥ ૭.૩૩ ॥

અસમેઽનધિકે સુસાધિતે નિજતાતે રવિરાશિદીધિતિ ।
પ્રદદૌ ત્રિજગજ્જયધ્વજં વિધિરેતદ્ગળસંગિ ભૂષણમ ॥ ૭.૩૪ ॥

અરિવારિજલક્ષણોલ્લસત્સુકુમારારુણ પાણિપદ્મયોઃ ।
પૃથુપીવરવૃત્તહસ્તયોઃઉપમાં નૈવ લભામહેઽનયોઃ ॥ ૭.૩૫ ॥

ભજતાં વરતર્કમુદ્રયા ધતિ હસ્તાગ્રમબોધમીશિતુઃ ।
અધિજાનુ સમર્પિતં પરં કૃતભૂયોભયભંગમંગલમ ॥ ૭.૩૬ ॥

સતતં ગળતા સ્વતઃ શ્રુતિત્રિતયેનેવ નિકામમંકિતઃ ।
સુવિડંબિતકંબુરીક્ષ્યતે વરરેખાત્રયવાન ગુરોર્ગળઃ ॥ ૭.૩૭ ॥

સકલાસ્તકલંકકાળિમસ્ફુરદિંદુપ્રકરોરુવિભ્રમમ।
અધરીકુરુતે સ્વશોભયા વદનં દેવશિખામણેરિદમ ॥ ૭.૩૮ ॥

અરુણાશ્મદલાંતરોલ્લસન્નવમુક્તાવલિમસ્ય લજ્જયેત ।
હસતઃ સિતદંતસંતતિઃ પરમશ્રીરરુણોષ્ઠરોચિષઃ ॥ ૭.૩૯ ॥

દ્વિજવૃંદકૃતં કુતૂહલાદ અનુયોગાંધુસહસ્રમુત્તમમ ।
ઈયમેકપદે સરસ્વતી શ્રુતિભર્તુઃ પરિપૂરયત્યહો ॥ ૭.૪૦ ॥

જલજાયતલોચનસ્ય માં અવલોકોઽયમુપેત્ય લાળયન ।
કુરુતે પરિરભ્ય પૂરિતં ભુવનાનંદકરસ્મિતાન્વિતઃ ॥ ૭.૪૧ ॥

ઉપકર્ણમમુષ્ય ભાસિતા તુળસી મંત્રયતીવ લાળિતા ।
મમ નાથ પદં ન મત્સરાત જલજાદ્યાનિ હરેયુરિત્યલમ ॥ ૭.૪૨ ॥

વિભવાભિભવોદ્ભવાદિકં ભુવનાનાં ભુવનપ્રભોર્ભ્રુવોઃ ।
અનયોરપિ દભ્રવિભ્રમાત સભવાંભોજભવાત્મનાં ભવેત ॥ ૭.૪૩ ॥

ત્રિજગત્તિલકાળિકાંતરે તિલકોઽયં પરભાગમાપ્તવાન ।
હરિનીલગિરીંદ્રમસ્તકસ્ફુટશોણોપલપંક્તિસન્નિભઃ ॥ ૭.૪૪ ॥

નવમંબુધરં વિડંબયદ્ધરવિદ્યુદ્ધલયં જગદ્ગુરોઃ ।
અવલોક્ય કૃતાર્થતામગાં સજટામંડલમંડનં વપુઃ ॥ ૭.૪૫ ॥

ન રમાઽપિ પદાંગુલીલસન્નખધૂરાજદનંતસદ્ગુણાન ।
ગણચેદ ગણચંત્યનારતં પરમાન કોઽસ્ય પરો ગુણાન વદેત ॥ ૭.૪૬ ॥

ન કુતૂહલિતા કુતૂહલં તનુમેનામવલોક્ય સદ્ગુરોઃ ।
સનવાવરણાંઽદર્શિનો ગૃહબુદ્‌ધ્યા મમ નિષ્કુતૂહલમ ॥ ૭.૪૭ ॥

ઈતિ ચિંતયતા મહાધિયા પદવીં બાહ્યગતામતીયુષા ।
સ મનોનયનૈઃ પુરાગતઃ તત આપે વપુષાઽપિ વેદરાટ ॥ ૭.૪૮ ॥

ગુરુભક્તિભરાનતાકૃતિઃ વિરચય્યાંજલિબંધમંજસા ।
ક્ષણમામુકુળીકૃતેક્ષણઃ સ ગુરું કેવલમભ્યવંદત ॥ ૭.૪૯ ॥

વિનયાભરણેન ભૂષિતઃ સ્ફુટમષ્ટાંગવિશિષ્ટચેષ્ટિતઃ ।
ભગવત્તમપાદપંકજે ભગવાન સ પ્રણનામ ભાગ્યવાન ॥ ૭.૫૦ ॥

સ નિરીક્ષ્ય પરાશરાત્મજઃ પ્રણતં પ્રેષ્ઠમશેષસદ્ગુણૈઃ ।
કરયોર્યુગળેન વલ્ગુના તમુદસ્થાપયદાશુપાતિના ॥ ૭.૫૧ ॥

અમિતપ્રમતિં શ્રુતીશ્વરઃ પરિરેભે પરિગૃહ્ય તં દૃતમ ।
પ્રણયામૃતપૂર્ણમાનસઃ સ્મિતવક્ત્રઃ પરિફુલ્લલોચનઃ ॥ ૭.૫૨ ॥

યમજામ્યુદવાસ ઊર્જિતો યદિ જાંબૂનદવારિ સંવ્રજેત ।

કનકદ્યુતિમધ્વસંગવાનુપમીયેત સ તેન નીલભાઃ ॥ ૭.૫૩ ॥

યદિ રાજવિભૂષણૈર્યુતૌ દ્વિજવર્યાન્વયજાવિમૌ હરી ।
નૃપગોત્રભુવોઃ પુરાઽત્મનોઃ સ્ફુટતુલ્યાવુપગૂઢયોર્મિથઃ ॥ ૭.૫૪ ॥

ઈદમાપ શુકોઽપિ લાળનં ન સમગ્રં જગતાં પિતુઃ પિતુઃ ।
અલભિષ્ટ યદેષ ધન્ય ઈત્યતિકૌતૂહલમાપિ તાપસૈઃ ॥ ૭.૫૫ ॥

અમુષ્ય શિષ્યા વિનયેન તસ્મૈ ગુરોરભિપ્રાયવિદો વિદગ્ધાઃ ।
તદાઽનુરૂપં દદુરાસનં તે ચતુર્મુખાયેવ મુકુંદદાસાઃ ॥ ૭.૫૬ ॥

આસ્યતામિત્યુદીર્યોપવિષ્ટે સત્યવત્યાઃ સુતે સત્યવાચિ ।
નંદયન મંદહાસાવલોકૈઃ તાન મુનીંદ્રાનિહોપાવિશત સઃ ॥ ૭.૫૭ ॥

અવગમ્ય તં મુનિગણા વરિષ્ઠતો
વિધિવદ્વ્યધુર્વિધિવિદોઽસ્ય માનનામ ।
અપિ સંકથાઃ શ્રુતિસુખાઃ કવીંદ્રયો
રનયોર્નિશમ્ય પરમાં મુદં યયુઃ ॥ ૭.૫૮ ॥

સજ્જ્ઞાનાચાઽનંદવિજાનમૂર્તી પ્રાપ્તૌ પૃથ્વીમાશ્રમે તત્ર તાવત ।
જાજ્વલ્યેતે વિષ્ણુવાયૂ સ્મ દેવૌ વેદવ્યાસાનંદતીર્થાભિધાનૌ ॥ ૭.૫૯ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત

નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે સપ્તમઃ સર્ગઃ ॥

www.yousigma.com